Homas
the spiritual way to success
K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ शुक्रादिमन्त्रप्रसङ्गात् मन्त्रदेवताप्रकाशिकोक्ता इतरग्रहमन्त्रा उच्यन्ते-

अङ्गारकमन्त्रस्य ब्रह्मा ऋषिः । गायत्री छन्दः । अङ्गारको देवता । अं बीजम् । आय शक्तिः । बीजेनैव षडङ्गानि । ध्यानम्—

नमाम्यङ्गारकं देवं रक्ताभं वरभूषणम् ।
जानुस्थवामहस्ताढ्यं साभयेतरपाणिनम् ॥

अं अङ्गारकाय नमः । इति मन्त्रः । अष्टसहस्रं जपः । आज्येन दशांशं होमः । केवलपद्मे समावाह्य समर्चयेत् ॥ अङ्गैः प्रथमावृतिः । नवग्रहैर्द्वितीयावृतिः । इन्द्रादिभिस्तृतीया । एवं संपूजयेत् ॥